**2022**

**M.A.**

**4th Semester Examination**

**SANSKRIT**

**PAPER—SAN-401**

*Full Marks* : 40

*Time* : 2 Hours

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः। (देवनागर्या)

**SAN-401A (POETICS-III)**

**Group – A**

**1.** प्रश्नद्वयं समाधेयम् — 2×2

(a) गुणीभूतव्यङ्ग्यस्य कति भेदाः? के च ते?

(b) को नाम चित्रतुरगन्याय:?

(c) कति स्थायिभावा:? के च ते?

**2.** प्रश्नद्वयं समाधेयम् — 2×4

(a) अविवक्षितवाच्यध्वने: स्वरूपनिर्देशपूर्वकं सोदाहरणं विभाग: प्रतिपादनीय:।

(b) अष्टौ नाट्ये रसा: स्मृता: — व्याख्यायताम्।

(c) उत्पत्तिवादे विभावानु भावव्यभिचारिभि: सह स्थायिन: सम्बन्धा: कथं प्रतिपादिता:?

**3.** एक: प्रश्न: समाधेय: — 1×8

(a) अभिनवगुप्तेन रसप्रतीति: यथा समुपस्थिता: तद् सयुक्ति प्रतिपाद्यताम्

(b) भुक्तिवादं व्याख्याय भुक्तिवादे समालोचकानां समादराभावे कारणानि उपस्थाप्यन्ताम्।

## Group – B

**4.** प्रश्नद्वयं समाधेयम् — 2×2

(a) 'रसगङ्गाधरः' इत्यस्य व्युत्पत्तिः का? तस्य ग्रन्थस्य स्वकीयवैशिष्ट्यमेकं लिख्यताम्।

(b) किं नाम लोकोत्तरत्वम्? 'धनं ते दास्यामि' इति वाक्यार्थधीजन्यस्य आह्लादस्य कथं न लोकोत्तरत्वम्?

(c) आस्वादोद्बोधकत्वस्य काव्यत्वप्रयोजकत्वं कथं न भवति?

**5.** द्वयोर्व्याख्या कार्या — 2×4

(a) रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता।

(b) लक्षणे गुणालङ्कारादिनिवेशो न युक्तः।

(c) प्रतिभात्वञ्च कवितायाः कारणतावच्छेदकम्।

**6.** एकः प्रश्नः समाधेयः — 1×8

(a) रसगङ्गाधरसम्मतं काव्यप्रयोजनमालोच्यताम्।

(b) मम्मटमते काव्यं किम्? तच्च कतिविधम्? कानि च तानि? सोदाहरणं तेषां लक्षणं विचार्यताम्।

---

## SAN-401B (SARVADARSANASAMGRAHA)

### Group – A

**1.** प्रश्नद्वयं समाधेयम् — 2×4

(a) सर्वदर्शनसंग्रहः केन प्रणीतः तत्र कति दर्शनामानि सन्ति? तस्य एकायाः टीकायाः नाम लिख्यताम्।

(b) 'षण्नास्तिकाः' - इत्यनेन केषां बोधः?

(c) चार्वाकैः आकाशमङ्गीक्रियते न वा? कथञ्च?

(d) के मुत्तककच्छाः?

(e) 'यत् सत् तत् क्षणिकम्' – इत्यस्य अनुमानाकारः कः? तत्रानुमाने साध्यं किम्? पक्षः कः? को हेतुः? किं वा उदाहरणम्।

(f) माध्यमिकादिसम्प्रदायचतुष्टयं व्यनिरिच्य बौद्धानाम् अन्यत् सम्प्रदायद्वयंम् उल्लिरव्यताम्।

**2.** टीका लेख्या (यथेच्छं चतुष्टयस्य) : 4×4

(a) देहात्मवादः

(b) अनृतव्याघातपुनरुत्त्कदोषाः

(c) काशकुशावलम्बनन्यायः

(d) रत्नत्रयम्

(e) पञ्चकारणी।

(f) अर्थक्रियाकारित्वम्।

**3.** यथेच्छं प्रश्नद्वयं समाधेयम् — 2×8

(a) क्षणिकत्ववादप्रतिष्ठायां बैद्धानां युत्त्कयः उपस्थाप्यन्ताम्।

(b) अनुमानस्य प्रामाण्यप्रतिष्ठायां न्यायचार्वाकमतं निरस्य बौद्धमतं सयुत्त्कि उपस्थापयत।

(c) क्षणिकत्ववादनिरसने जैनानां युत्त्कयः उपस्थाप्यन्ताम्।

(d) चार्वाकमते कः पुमर्थः? तस्य पुमर्थत्वं. युत्त्कियुत्त्कं न वेति विचार्यताम्।

—